# २०. पादुका सहस्रम् - इन्द्रनील पद्धतिः (३०)

हरिणा हरिनीलैश्च प्रतियत्नवतीं सदा ।
अयत्न लभ्य निर्वाणा माश्रये मणिपादुकाम् ॥ २०.१॥ ६८१॥

हरिरत्न मरीचय स्तवैते नव नीलीरस निर्विशेष वर्णाः ।
श्रुतिमूर्धनि शौरिपादरक्षे पलिता नुद्भवभेषजं भवन्ति ॥ २०.२॥ ६८२॥

अलकैरिव बिम्बितैः श्रुतीनां
हरिनीलैः सृजसि त्वमुन्मयूखैः ।
कमला दयितस्य पादरक्षे
करुणोदन्वति शैवल प्ररोहान् ॥ २०.३॥ ६८३॥

अनघै र्हरिनील पद्धतीनां प्रथमानै र्मणिपादुके मयूखैः ।
अधरीकुरुषे रथाङ्गपाणे रमिता मूर्ध्व मवस्थितस्य कान्तिम्॥२०.४॥ ६८४॥

चरणावनि भाति सह्यकन्या हरिनील द्युतिभि स्तवानुविद्धा ।
वसुदेव सुतस्य रङ्गवृत्ते र्यमुनेव स्वयमागता समीपम् ॥ २०.५॥ ६८५॥

अवधीरित देवतान्तराणा मनघैस्त्वं मणिपादुके मयूखैः ।
हरिनील समुद्भवै र्विधत्से हरिसारूप्य मयत्नतो जनानाम् ॥ २०.६॥ ६८६॥

नेत्रेषु पुंसां तव पादरक्षे
नीलाश्म भासा निहिताञ्जनेषु ।
श्रिया समं संश्रित रङ्गकोशो
निधिः स्वयं व्यक्ति मुपैति नित्यम् ॥ २०.७॥ ६८७॥

अभङ्गुरा मच्युत पादरक्षे मान्यां महानीलरुचिं त्वदीयाम् ।
निश्श्रेयस द्वारक वाटिकायाः शङ्के समुत्पाटन कुञ्चिकां नः॥२०.८॥ ६८८॥

जीवयत्यमृत वर्षिणी प्रजाः तावकी दनुजवैरि पादुके ।
घोरसंसरण घर्मनाशिनी कालिकेव हरिनील पद्धतिः ॥ २०.९॥ ६८९॥

शतमखोपल भङ्ग मनोहरा विहरसे मुरमर्दन पादुके ।
मणिकिरीट गणेषु दिवौकसां मधुकरीव मनोरम पङ्क्तिषु॥२०.१०॥६९०॥

अन्विच्छतां किमपि तत्त्व मनन्य दृश्यं
सम्यक्प्रकाश जननी धृत कृष्णरूपा ।
पादावनि स्फुरसि वासव रत्नरम्या
मध्ये समाधि नयनस्य कनीनिकेव ॥ २०.११॥ ६९१॥

मातः सलील मधिगम्य विहारवेलां
कान्तिं समुद्वहसि काञ्चन पादुके त्वम् ।
लक्ष्मी कटाक्ष रुचिरै र्हरिनीलरत्नैः

लावण्य सिन्धु पृषतै रिव रङ्गधाम्नः ॥ २०.१२॥ ६९२॥

क्लृप्ताव कुण्ठन विधि र्मणिपादरक्षे
नीलांशुकै र्वलभि दश्म समुद्भवैस्ते ।
सङ्गच्छते मुनिजनस्य मतिः समाधौ
रात्रौ समस्त जगतां रमणेन लक्ष्म्याः ॥ २०.१३॥ ६९३॥

द्रष्टुं कदाचन पदावनि नैव जन्तुः
शक्नोति शाश्वत निधिं निहितं गुहायाम् ।
कृष्णानुरूप हरिनील विशेष दृश्या
सिद्धाञ्जनं त्वमसि यस्य न देवि दृष्टेः ॥ २०.१४॥ ६९४॥

प्रत्येमि रङ्गनृपते र्मणिपादुके त्वां
कृष्णान्तरङ्ग रुचिर्भि र्हरिनीलरत्नैः ।
विश्वापराध सहनाय पदं तदीयं
विश्वम्भरां भगवतीं समये भजन्तीम् ॥ २०.१५॥ ६९५॥

मत्वा मषीं परिमितां भवती तदन्यां
वैकुण्ठ पाद रसिके मणिपादुके स्वान् ।
अङ्क्ते स्वयं किरण लेपिभि रिन्द्रनीलैः
आशा तटेषु ललिता नपदान वर्णान् ॥ २०.१६॥ ६९६॥

वलमथन मणीनां धामभि स्तावकानां
मधुरिपु पदरक्षे वासरै रव्यपेता ।
अभिसरण पराणां वल्लवीनां तदाऽऽसीत्
शमित गुरुभयार्तिः शर्वरी काचिदन्या ॥ २०.१७॥ ६९७॥

शतमख मणिभङ्गै रुन्मयूखै र्दिशन्ती
शरण मुपगतानां रङ्गनाथेन साम्यम् ।
प्रथयसि जगति त्वं पादुके हैतुकानां
उपनिष दुपगीतां तत्क्रतुन्याय वार्ताम् ॥ २०.१८॥ ६९८॥

परिचरति विधौ त्वां पादुके रङ्गभर्तुः
पद सरसिज भृङ्गै र्भासुरै रिन्द्रनीलैः ।
प्रकटित यमुनौघा भक्ति नम्रस्य शम्भोः
परिणमयसि चूडा विष्णु पद्याः प्रयागम् ॥ २०.१९॥ ६९९॥

पद किसलय सङ्गात्पादुके पत्रलश्रीः
नखमणिभि रुदारै र्नित्य निष्पन्न पुष्पा ।
शतमख मणिनीला शौरि लावण्य सिन्धोः
निबिडत मतमाला काऽपि वेलावनी त्वम् ॥ २०.२०॥ ७००॥

त्वयि विनिहित मेतत् केऽपि पश्यन्ति मन्दाः
शतमख मणिजालं शार्ङ्गिणः पादरक्षे ।

वयमिदमिह विद्मः प्राणिनां भावुकानां
हृदयगृह गुहाभ्यः पीतमन्धं तमिस्रम् ॥ २०.२१॥ ७०१॥

क्लृप्त श्यामा मणिभि रसितैः कृष्णपक्षेण जुष्टा
श्रेयः पुंसां जनयसि गतिं दक्षिणा मुद्वहन्ती ।
तेनास्माकं प्रथयसि परं पादुके तत्त्वविद्भिः
मौलौ दृष्टां निगम वचसां मुक्तिकाला व्यवस्थाम् ॥ २०.२२॥ ७०२॥

सद्भिर्जुष्टा समुदितविधु जैत्रयात्रा विनोदेषु
आतन्वाना रजनि मनघा मिन्द्रनीलांशुजालैः ।
चित्रं ख्याता कुमुद वनतः पादुके पुष्यसि त्वं
व्याकोचत्वं विबुध वनिता वक्त्र पङ्केरुहाणाम् ॥ २०.२३॥ ७०३॥

नित्यं लक्ष्मी नयन रुचिरैः शोभिता शक्रनीलैः
सालग्राम क्षितिरिव शुभैः शार्ङ्गिणो रूपभेदैः ।
साकेतादेः समधिक गुणां सम्पदं दर्शयन्ती
मुक्तिक्षेत्रं मुनिभि रखिलैः पादुके गीयसे त्वम् ॥ २०.२४॥ ७०४॥

पादन्यास प्रियसहचरीं पादुके वासगेहात्
त्वामारुह्य त्रिचतुरपदं निर्गते रङ्गनाथे ।
अन्तः स्निग्धै रसुर महिला वेणि विक्षेप मित्रैः
श्यामच्छायं भवति भवनं शक्रनीलांशुभिस्ते ॥ २०.२५॥ ७०५॥

या ते बाह्याङ्गण मभियतः पादुके रङ्गभर्तुः
सञ्चारेषु स्फुरति विततिः शक्रनील प्रभायाः ।
विष्वक्सेन प्रभृतिभि रसौ गृह्यते वेत्रहस्तैः
भ्रूविक्षेप स्तव दिविषदां नूनमाह्वान हेतुः ॥ २०.२६॥ ७०६॥

अक्ष्णोरञ्जन कल्पना यवनिका लास्य प्रसूते र्गतेः
चिद्गङ्गा यमुना मुकुन्द जलधे र्वेला तमालाटवी ।
कान्ता कुन्तल सन्ततिः श्रुतिवधू कस्तूरिका लङ्क्रिया
नित्यं रत्नपदावनि स्फुरति ते नीला मणिश्रेणिका ॥ २०.२७॥ ७०७॥

निरन्तर पुरन्दरो पलभुवं द्युतिं तावकीं
अवैमि मणिपादुके सरणि सङ्गिनीं रङ्गिणः ।
तदीय नव यौवन द्विरद मल्ल गण्डस्थली-
गलन्मद झलज्झला बहुल कज्जल श्यामिकाम् ॥ २०.२८॥ ७०८॥

प्रतीमस्त्वं पादावनि भगवतो रङ्गवसतेः
घनीभूता मित्थं पदकमल माध्वी परिणतिम् ।
स्फुरन्तः पर्यन्ते मद गरिम निष्पन्द मधुप-
प्रसक्तिं यत्रैते विदधति महानील मणयः ॥ २०.२९॥ ७०९॥

नमतां निजेन्द्रनील प्रभवेन मुकुन्दपादुके भवती ।

तमसा निरस्यति तमः कण्टक मिव कण्टकेनैव ॥ २०.३०॥ ७१०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वङ्केटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
इन्द्रनील पद्धति विंशी ॥